संस्कृतवार्ताः

10.10.2025

प्रात: - 06:55

प्रधानमंत्री-यूके-फिनटेक:

प्रधानमंत्री नरेंद्रमोदी प्रोक्तवान् यत् देशस्य डिजिटल-पारिस्थितिकी-तंत्र नवाचाराय समावेशनाय च वैश्विकं मानंकं संस्थापयति। गतसायं मुम्बय्यां ग्लोबल-फिनटेक-फेस्ट इति कार्यक्रमं संबोधयन् श्रीमोदी प्रोक्तवान् यत् प्रौद्योगिक्याः लोकतंत्रीकरणेन भारतं विशिष्टेषु समावेशि-राष्ट्रेषु एकम् प्रोद्योगिकीसम्पन्नं राष्ट्रम् अस्ति। सः प्रोक्तवान् यत् देशे प्रतिमासं यूपीआई इत्यस्य माध्यमेन पञ्चविंशति-लक्ष-कोटिरूप्यकाणां विंशत्यर्बुदसंख्याकम् धनादानप्रदानं भवति।

ग्लोबल-फिनटेक-फेस्ट इत्येत् सम्मेलनं संबोधयन् , यूनाइटेड-किंगडम इत्यस्य प्रधानमंत्री कीर-स्टारमरः इत्यसौ अकथयत् यत् ब्रिटेन-भारतदेशौ स्वाभाविक-सहयोगिनौ, फिनटेक इत्यत्र वैश्विकाग्रिण्यौ च स्तः। सः प्रोक्तवान् यत् भारत-ब्रिटेन-मुक्त-व्यापार-साहमत्यं द्वयोः देशय़ोः सकल-गृहोत्पादं वृद्धिं प्रति नेष्यति।

भारत-यू. के.

विदेशसचिवः विक्रम मिसरी इत्येषः अवदत् यत् भारत-यू. के. देशयोः मध्ये ऐतिहासिकं मुक्तव्यापारसमन्वयं भारतस्य विकसितभारतस्य दृष्टिं प्रवर्धयिष्यति। मुम्बई-नगरे ह्यः वार्ताहर-सम्मेलनं सम्बोधयन् श्रीमिसरी वर्यः अवदत् यत् भारत-यू. के. देशयोः मध्ये ऐतिहासिकं एफ्. टि. ए. इति भारतस्य विकासित्-भारतस्य दृष्टिं प्रवर्धयिष्यति। पञ्चविंशत्यधिकैकशत जनानां उच्च-प्रतिनिधिसङ्घेन सह यू. के. देशस्य प्रधानमन्त्रिणः कीर् स्टार्मरस्य प्रथमस्य आधिकारिकयात्रायाः विषये भाषमाणः श्रीमिसरी सूचितवान् यत् प्रधानमन्त्री मोदी, प्रधानमन्त्री स्टार्मरः च क्षेत्रीय-वैश्विक-विषयेषु विस्तृतं चर्चां कृतवन्तौ। उभौ नेतारौ यू. के. देशस्य विश्वविद्यालयानां कुलपतिभिः सह वार्तालापं कृतवन्तौ, सी. ई. ओ. फ़ोरम् अपि च पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य ग्लोबल् फिन्टेक् फ़ेस्ट् कार्यक्रमं सम्बोधितवन्तौ। श्री मिस्री इतोऽपि सूचितवान् यत् संयुक्तराष्ट्र-सुरक्षा-परिषदि स्थायीसदस्यत्वेन स्थानं प्राप्तुं भारतं यू. के.-देशात् समर्थनं प्राप्नोत्।

प्रधानमन्त्री- नेतन्याहु- ट्रम्प्

अमेरिका-देशस्य राष्ट्रपतेः ट्रम्प्-वर्यस्य गजा-शान्ति-योजनायाः अन्तर्गतं कृतप्रगतिविषये इस्रेल्-देशस्य प्रधानमन्त्रिणं बेञ्जामिन् नेतन्याहु-वर्यं दूरभाष-संवादद्वारा प्रधानमन्त्रिणा नरेन्द्रमोदिना अभिनन्दितम्। सामाजिकान्तर्जालीय सन्देशे प्रधानमन्त्री बन्धकानां मुक्ति विषये सन्धेः स्वागतं कृतवान्।

ततः पूर्वं, प्रधानमन्त्री मोदी अमेरिका-देशस्य राष्ट्रपतिं डोणाल्ड् ट्रम्पं ऐतिहासिकस्य गाजा-शान्ति-योजनायाः सफलतायाः विषये दूरभाष-संवादद्वारा अभिनन्दितवान्।

अयोध्या - विस्फोटः

उत्तरप्रदेशे गतसायं अयोध्या-मण्डलस्य पुरा-कलन्दर्-क्षेत्रे निर्माणाधीन भवन-पतनेन न्यूनातिन्यूनं पञ्चजनाः मृताः। एस्. एस्. पी. इति वरिष्ठ-आरक्षि-अधीक्षकः गौरव् ग्रोवरः अवदत् यत् ग्रामवासिनः उक्तवन्तः यत् यदा पगला भारी-ग्रामस्य समीपे क्षेत्रे निर्माणाधीन भवनं पतितम् तदा विस्फोटसदृशः उच्चः ध्वनिः श्रुतः। आरक्षकाः कस्यापि शङ्कास्पद-क्रियायाः निराकरणं कृतवन्तः, एस्. एस्. पि. श्रीग्रोवरः अवदत् यत् प्रथमदृष्ट्या एतत् सिलिण्डर्-विस्फोटः इव दृश्यते।

ऋतु-विभागः

भारत-ऋतु-विभागेन अद्य असम, मेघालय, नागालैण्ड्, मणिपुर्, मिजोरम्, त्रिपुरा इत्येतेषु प्रदेशेषु अतिवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। अगामि द्वि-त्रि-दिनेषु आन्ध्रप्रदेश, दक्षिण-आन्तरिक-तटीय-कर्नाटक, केरल, माहे, ओडिशा, तमिलनाडु, पुदुचेरी, करैकल्-राज्यानां च पृथक्-पृथक् स्थानेषु अपि एतादृशी स्थित्याः आशङ्का विद्यते।

।।इति वार्ता:।।